श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीमत् मैसूर् आण्डवन् श्री श्रीनिवासरामानुजमहादेशिकैः अनुगृहीता

# ॥ श्रीवेङ्कटेश स्तुतिः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font. Our sincere thanks to Dr. Desikan Parthasarathy of Bangalore for proofreading this document.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीवेङ्कटेश स्तुतिः ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

यत्कृपालेशमात्रेण सदोल्लसति सन्मतिः।
वेदान्तलक्ष्मणस्सोऽयं विभातु हृदिमे गुरुः॥

श्रीमान् वेदान्तसूरिः करकमलयुगे ज्ञानमुद्रां च कोशं
बिभ्राणोब्जासनस्थो वनरुहतुलसीदामवान् वादिसिंहः।
ब्रह्मज्ञस्सर्वतन्त्रेष्वतिकुशलमतिः कीर्तिमूर्तिर्महात्मा
श्रेयोदर्शी जननां कविकुलतिलकः सन्निधत्तां सदा नः॥ १ ॥

मान्यादात्रेयगोत्रादखिलगुणनिधेर्मातुलात् देशिकेन्द्रात्
श्रीमद्रामानुजार्यात् अधिगतसकलात्मीयशस्त्रार्थसारः।
प्रज्ञाचार्योपदिष्टान्यनितरसुलभान्युक्तिरत्नानि योऽदात्
लोकायामोदतस्तं शुभगुणजलधिं वेदचूडार्यमीडे॥ २ ॥

वेङ्कं वेदान्तसूरेः पदकमलयुगं सर्वदा भावयेऽहं
प्राज्ञानां शुद्धबुद्धिप्रदमुरुसुखदं मोक्षदोपायनिष्ठम्।
यत्प्राप्त्यर्थं जुहावाश्रितजनशरणोऽनन्तसूरिश्च सुप्तौ
विश्वामित्रान्ववायं वृषगिरिदयितः स्वीयघण्टां प्रदित्सुः॥ ३ ॥

कञ्जस्य द्विपदस्य पर्णतुलनां याताङ्गुलीनां ततिः
श्रीमद्वेदशिरोगुरोरविरतं मन्मानसे प्रोल्लसेत्।
यं प्राप्तुं वृषशैलनायकहरेः घण्टामयं प्रापिता
माता द्वादशवत्सरैरबिभरत् तोता स्वगर्भं शुभैः॥ ४ ॥

टङ्कं यद्दुरितोपलोद्भिदलने वेदान्तसूरेः पद
द्वन्द्वं भावयतां अलङ्कृतरथच्छत्रादि विभ्राजते।

यः काञ्च्यां विभवे नभस्य उदितः विष्णोश्शुभे मे महे
तीर्थाहे वृषशैलशेखरपतेः वर्वर्ति कीर्त्युज्वलः॥ ५॥

नाथे श्रीकविवादिपञ्चवदनाचार्यस्य जङ्घायुगं
संसारानुगतेर्निवर्त्य तरसा गत्यै च निश्रेयसः।
यो रामानुजसूदसूनुजसुतासूनुर्भवत्यद्भुतः
श्रीरामानुजवादिहंसगुरुरस्यान्तेनिवास्यार्तिहा॥ ६॥

थाभासं तदुरोजविभ्रमनिभं जान्वोर्युगं संस्मरा-
म्यात्मज्ञानददर्पणं पदजुषां श्रुत्यन्तचूडागुरोः।
प्राचार्यस्य मुदावहो वरदगुर्वाख्यस्य यः शैशवे
तस्यानुग्रहतः प्रभावितमतिस्साशीर्वचः प्रेक्षितः॥ ७॥

आर्यो देशिकवर्य एष नियतश्चारूरुयुग्मं स्तुवम्
न्यास श्रीकृतमङ्गलाभिषवण स्तन्नागशुण्डोपमम्।
पित्रा यस्समुपात्तकर्मनिचय स्तेनोपनीत स्तथा
साङ्गाध्याय उपाजहार सुदतीं लेभे गुरुं तं स्तुवे॥ ८॥

कल्याणं दिशतात् कटीतटवरः दिव्यस्त्रयीशेखरा-
चार्यस्यामलकोमलाद्रिरुचिरः श्रीवासनामोदितः।
वेदान्तद्वयमात्ममातुलकृपाभूम्ना रहस्यान्यपि
प्राप्याभ्राजत सर्वशास्त्रनिपुणो यस्तं श्रये देशिकम्॥ ९॥

विश्वासातिशयं दिशेदविरतं श्रीवेदचूडागुरोः
कट्या चोर्ध्वधृतस्सुधांशुधवलो भात्युत्तरीयस्सदा।
काञ्च्यां यो वरदं रमासहचरं संसेवमानो नुतीः
सर्वाभीष्टफलप्रदास्सुपठतां बह्वीर्वितन्वन् बभौ॥ १०॥

तारार्थं निगमान्तदेशिकमणेः नाभिर्महाब्धेर्महा-
वर्तोत्कर्षवती स्फुटं प्रकटयत्वात्मावबोधं हितम्।
पारावार परीवृतेऽतिमहिते तारार्थधाराधरः
योऽवर्षत् स्वकृते रहस्यनिचये लोकाभिरक्षोन्मुनाः॥ ११॥

किंवा वर्णयितुं क्षमा वयमिमे यो निर्मये सत्कृतीः
तद्देयादुदरं वलित्रयधरं श्रीवेदचूडागुरोः।
भक्तेष्टप्रदमाप्तसिन्धरमुखं बन्धुं बुधानां सदा
श्लोकैस्संस्तुतवान् अवाप सकलास्सिद्धीश्च सर्वेष्टदाः॥ १२॥

कर्तव्यं सकृदेव तत्प्रपदनं सर्वार्थदं श्रीपते
शास्त्रोदीरितवर्त्मनेत्यसदृशैः ग्रन्थैर्व्यवास्थापयत्।
यो वा वेङ्कटनाथदेशिकमणिः विद्विड्वि राशंसितः
श्रीशैलेशदयाशतीं विरचयन्हृष्टस्त माभावये॥ १३॥

केनान्येन विवादतो मलिनतां प्राप्ता प्रपत्तिः परा
निर्दुष्टा सकलेष्टदा श्रुतिशिरस्सूरिं विना रक्षिता।
येनाद्यावधि सुप्रतिष्ठितमिता निष्कण्टका भ्राजते
सोऽयं श्रीनिगमान्तदेशिकमणिः भूयात् सतां श्रेयसे॥ १४॥

सन्मार्गं नयतात् तनोतु सदयं वेदान्तसूरेरुरः
स्वान्तं मे विमलीकरोतु च सदा सद्भावनापूरितम्।
सारासारविवेचकं कलयतात् श्रीरङ्गराजोषितं
तत्तादृङ्मनसं परात्पररसं सञ्चिन्तयाम्यन्वहम्॥ १५॥

रीतिस्सर्वा यदीया सकलजनमनोहारिणी शर्मदात्री
बाह्वोर्मूले विभातां श्रुतिशिखरगुरोरङ्किते शङ्खचक्रे।
चक्रे श्रीरङ्गनेतुश्चरणकमलयोर्मङ्गळाशासनं यः
वाद्युन्मत्तान् जिगाय प्रमुदितहृदयस्संस्तुवे तं सदाहम्॥ १६॥

वेदान्ताचार्यवर्यो दिशतु सुविशदं सर्ववेदान्ततत्वं
व्याख्यामुद्राकरो य श्शुभगुणनिलयस्सत्यवाक् शुद्धकर्मा।
प्रज्ञाकल्पद्रुमस्सन् सकलसुमनसां सर्वकामान् प्रदेयात्
धन्या यत्सप्तशत्यामहमतिविभवं कीलकेऽपीक्षितारः॥ १७॥

दान्तो वेदान्तसूरिर्विषमभवकृतात् बन्धनान्मोचयेन्नः
प्रज्ञाकूपारपारङ्गत उरुकरुणः पुस्तकोद्भासिहस्तः।

यः प्रागस्तोकबुद्धिं व्यजयत विबुधं कृष्णमिश्रं प्रभावान्
स्वीयात् सङ्कल्पसूर्योदयत इह मुदा प्राप तं संश्रयेऽहम्॥ १८ ॥

तान्तानस्मान् नितान्तं करणपरवशान् सान्त्वयेदात्मवाग्भिः
यत्तातोऽनन्तसूरिस्स्वयमपि सकलाम्नायचूडार्यसूरिः।
कण्ठस्तस्योपकण्ठानतजननिवहान् शङ्खसङ्काशकाशः
श्रीभाष्यं कण्ठपाठं व्यतनुत सुलभं तं च सम्भावयामि॥ १९ ॥

चार्वाकान् चारुगीर्भिः श्रुतिपथविमुखान् लोकसम्मोहकांस्तान्
अद्धा दूरीचकार श्रुतिशिखरगुरुर्नीतिमूर्तित्रयीभिः।
सच्चारित्रं यदीयं तदवतु महतो दुष्कृतान्मां पुनातु
वैदुष्यं चातनोतु प्रियहयवदनाम्भोजपीयूषपायी॥ २० ॥

यस्मिन् रामानुजार्यः परमकरुणया स्वीयसिद्धान्तरक्षा-
भारं श्रीकूरनाथप्रभृतिगुरुवरद्वारतोऽस्थापयत् सः।
वेदान्तार्याभिधानः कलितबहुयशाः लक्ष्मणांशं दधानः
कुर्यात् वैराग्यमूर्तिस्त्वधिकशतकृतीः सर्वजिह्वाविधेयाः॥ २१ ॥

वर्धिष्णुर्विष्णुनाम्नां जपत इह जनो याति सर्वार्थसिद्धिं
वेदान्ताचार्यनाम्नां मननत उभयाम्नायवेत्ता चकास्ति।
तत्पादाब्जप्रणामादनितरसुलभां स्तान्पुमर्थानुपैति
तद्ग्रन्थालोकनेन प्रविजितविमतस्सम्प्रबुद्धौ विभाति॥ २२ ॥

यस्साक्षाद्वेङ्कटेशो जगदुपकृतये स्वेन नाम्नाविरासीत्
तद्घण्टांशोऽथवेति प्रथित इह गुरुर्यस्य पुत्रोऽपि तद्वत्।
श्रीमद्देवाधिराजो वरद इति समाभिख्ययासीत् प्रसिद्धः
तं विद्वद्बृन्दवन्द्यं सुतवरसहितं वेदचूडार्य मीडे॥ २३ ॥

मेनेऽमेयप्रभावं प्रतिभटरहितं सर्वतन्त्रस्वतन्त्रं
कुर्वाणं वीक्ष्य यामे त्वनितरसुकरं रङ्गपादूसहस्रम्।
यं च श्रीरङ्गराजः कविकथकघटाकेसरीत्याजुहाव
श्रेयस्सूतिं सतां तं रचितबहुकृतिं संस्तुवे देशिकेन्द्रम्॥ २४ ॥

संक्षिप्ता विस्तृता वा कृतिततिरतुला तत्तदिच्छानुरूपा
वेदान्तार्यप्रणीता सकलजनमनोहारिणी धारणीया।
सङ्ख्यातीतापि तत्र प्रभवति विदिता मुक्तये काचिदेका
तत्तादृक्तारतम्यं कृतिषु न तु फले यस्य तं संस्तवीमि॥ २५ ॥

नित्यं तत्कर्णयुग्मं श्रुतिमधुरमनुं श्रीमुखोद्भासि वर्णं
मद्गीतं श्लोकरूपं निशमयतु गुरुस्सर्वदं सर्वदाता।
वेदान्तार्यस्सुवर्णं निजतनयकृतं हर्षतो गानलोलान्
सम्प्रेक्ष्याध्यात्मचिन्ताफलभुगभिमुखान् संविधत्तां श्रितान्नः॥ २६ ॥

धत्ते श्रीवैष्णवीयां श्रियमळिकतलं सूर्ध्वपुण्ड्रोज्ज्वलं यत्
वेदान्तार्यस्य तत्तद्गुरुवरकृपया सर्व एवोपयन्तु।
व्याख्या सौदर्शनीया यतिपतिरचितश्रीतभाष्यस्य याप्ता
यश्च प्राचीकटत्तां अतिविमलमतिष्वद्य यावत् स्तुवे तम्॥ २७ ॥

तामेवाहं समीडे कविकथकहरेर्नीलचूडां सुकेशैः
युक्ता मस्याब्जमाध्वीव्रतिभिरिव हरेर्मूर्तीमद्भिः कटाक्षैः।
एवं चापादचूडं गुरुवरसुषुमा संश्रितानां सुशोभां
सर्वक्षेमाय नित्यं प्रदिशतु च महाचार्यभूमा महात्मा॥ २८ ॥

सत्यं शान्तिर्विरक्तिर्विजितकरणता साधुता पारतन्त्र्यं
नैस्पृह्यं धीरता श्रीपतिपदकमलासक्ति रक्षोभ्यता च।
कारुण्यं निर्भरत्वं शुचिमृदुपटुता नम्रता मान्यतेति
यस्मिन्नाजानशुद्धाश्शुभगुणनिवहास्तं श्रये देशिकेन्द्रम्॥ २९ ॥

दाता वेदान्तसूरिः श्रुतिशतसुधियः संश्रितानां दयालुः
नानासिद्धान्तवेत्ता प्रणतमतिमतां सद्रहस्योपदेष्टा।
विश्वात्मोज्जीवनैकप्रपदनकलया दर्शितात्मप्रकर्षः
सङ्ख्यातीतप्रबन्धप्रणयननिपुणः पातु नस्तन्मनस्कान्॥ ३० ॥

हृद्यां स्वाद्यां रसज्ञा स्तुतिमम मधुना यत् त्वदीयां बुधानां
मोदात् वेदान्तसूरे! विभवकृतजने! कीलकेऽन्यासमाने।

आनन्दोद्गर्षवर्षे रसयति तदिदं त्वत्कटाक्षेक्षितानां
अस्माकं भागधेयं सुफलितमभवत् सप्तशत्युत्सवाहे॥ ३१ ॥

दिव्या व्याख्यानरीतिर्विविधकृतिततेर्यत्कृता सुप्रसिद्धा
लक्ष्म्यास्तत्वप्रतिष्ठा प्रपदनमहिमोत्कर्षताऽऽविष्कृता च।
यद्विक्षिप्ता विपक्षा यतिपतिमतसंरक्षणेऽत्यन्तदक्षः
सोऽयं वेदान्तसूरिर्विलसतु जगतां रक्षणे बद्धदीक्षः॥ ३२ ॥

॥ इति श्रीवेङ्कटेश स्तुतिः समाप्ता ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥